# Tirupputkuzhi Sri Vijayaraghava Perumal Suprabhatham

## श्रीगृध्रपुष्करिणीक्षेत्र

## श्री विजयराघव सुप्रभातम् ।

श्रीमदगृध्रसरस्तीर ! पारिजात रघूद्वह ! ।
सुप्रभातस्तुतिं वक्ष्ये सेवनां भक्तमण्दली ॥
कौसल्या सुप्रजाराम पूर्वासन्ध्याप्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम ॥
उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गळं गुरु ॥
विषयभक्तजनौघ निषेवित! प्रणतबृन्दमनोरथपूरग! ।
परमभक्त जटायु निषेवित प्रथितवैभव जागृहि जागृहि ॥
विजयराघव विश्रुतवैभव! प्रणतभक्त वरप्रद माधव ।
महितगृध्रसरः पुरनाथ भोः समरपुङ्गव जागृहि जागृहि ॥
स्वामिन्! अनन्तगुणसागर नारदाद्याः सर्वे महर्षय इहोपगताः प्रभाते ।
भास्वान् सहस्रकिरणान् विकिरन् विभाति श्रीमन् रघूद्वह हरे! तव सुप्रभातम् ॥
प्राबोधिकीं स्तुतिततिं सुभगां गुणन्तः श्री वैष्णवाः कुसुममाल्यसनाथ हस्ताः ।
तिष्ठन्ति तावक पदाब्ज दिदृक्षया भोः ! श्रीमन् रघूद्वह हरे! तव सुप्रभातम् ॥
कासारभूतमहदाह्वय सूरिवर्याः उच्चावचस्तुति ततीर्मधुरं पठन्तः ।
द्वारिस्थितास्तवकटाक्षण लिप्सवोऽत्र श्रीमन् रघूद्वह हरे! तव सुप्रभातम् ॥
श्रीभक्तिसारमुनिराट् महिता:स्वसूक्तीः प्रेमप्रकर्षभरितैः सहशिष्यवर्गैः ।
उच्चैर्गृणन्निह समेत्य विराजते भोः श्रीमन् रघूद्वह हरे! तव सुप्रभातम् ॥
श्रीमान् पराकुं शमुनिः शठकोपसूरिः साकं समेत्य मधुरेण कवीश्वरेण ।
द्वारि स्थितस्तवयशांसि गृणाति भत्त्या श्रीमन् रघूद्वह हरे! तव सुप्रभातम् ॥
राजाधिराज कुलशेखर सूरिरारात् स्वीयानि दिव्यवचनानि समुद्गृणन् सन् ।
त्वत्पादपङ्कज निषेवण लिप्सुरास्ते श्रीमन् रघूद्वह हरे! तव सुप्रभातम् ॥
श्रीविष्णुचित्तमुनिरण्महितप्रभावः गोदासमेत इह गायति मङ्गलानि ।

श्रीमान् जटायुरपि भक्तवरः समेतः श्रीमन् रघूद्वह हरे! तव सुप्रभातम् ॥

भक्ताङ्घ्रिरेणु कविराण्मुनिवाहनश्च स्वीयप्रबन्धपठन प्रवणौ समेतौ ।

युष्मत्पदाब्जयुग सेवनकौतुकेन श्रीमन् रघूद्वह हरे! तव सुप्रभातम् ॥

अत्यन्तभक्तिभरितः परकालसूरिः त्वत्कीर्तिबृन्द कथन प्रवणान्तरङ्गः ।

साकंनिजैः परमभक्तवरैः समेतः श्रीमन् रघूद्वह हरे! तव सुप्रभातम् ॥

श्री नाथ यामुन यतीश्वर कूरनाथ कान्तोपयन्तृ मुनिवर्य मुखामहान्तः ।

श्रीवैष्णवैः सह समेत्य गृणन्ति गाथाः श्रीमन् रघूद्वह हरे! तव सुप्रभातम् ॥

श्रीगृध्रराजपुर नायक राघवस्य श्रीवल्लभस्य चरणाम्बुरुहं प्रपन्नाः ।

ये सुप्रभातनुतिमित्थमुशन्ति भक्तया श्रीवैशणवाः सकलसम्पद माप्नुवन्ति ॥